# Shri Siddhalingamahashivayogi Suprabhatam

# श्रीसिद्धलिङ्गमहाशिवयोगिसुप्रभातम्

## Document Information

Text title : Shri Siddhalingamahashivayogi Suprabhatam

File name : siddhalingamahAshivayogisuprabhAtam.itx

Category : shiva, suprabhAta

Location : doc_shiva

Author : basavarAjashAstri

Proofread by : Vani V.

Latest update : October 31, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 31, 2022

*sanskritdocuments.org*

# श्रीसिद्धलिङ्गमहाशिवयोगिसुप्रभातम्

(पण्डित श्री बसवराजशास्त्रिविरचितम्)

श्री सिद्धलिङ्गेश महेश शम्भो चोत्तिष्ठ योगीश महाप्रकाश ।
शान्तेश दान्तेश भवाशु देव लोकानुरोधेन बहिर्मुखो हि ॥ १॥

उत्तिष्ठ निर्माय निरञ्जनेश निर्द्वन्द्व निस्तन्द्र निरस्तक्लेश ।
निर्भाव निश्चिन्त निराकुळालं निर्मोह नैर्गुण्य निरावलम्ब ॥ २॥

निवास गुल्मेषु पतित्रिराव मयूरवाणीकलहंसनादैः ।
प्रशान्तवातेन सुतोषदायी प्रभातमाविर्भवतीह काले ॥ ३॥

देवालये वाद्यनिनादघोषः दशाङ्ग धूपात्त सुगन्धवासः ।
कर्पूर नीराजन दीपकान्तिः घण्टारवस्तैर्जनताप्रबुद्धा ॥ ४॥

शरीरधर्मेण सुषुप्तिनाम्मा निर्लिप्तदेवेश समाधिवास ।
समाधिकार्यं तवनैजमेव तत्त्वस्वरूपस्य महामहिम्नः ॥ ५॥

तथापि लोकोद्धरणाय शम्भो समाधिकार्याद्विमुखो भवाशु ।
त्वत्पादपद्मं परिद्रष्टुकामाः ब्रह्मादिदेवाः समुपागता हि ॥ ६॥

सिद्धा मुनीन्द्राः प्रमथाश्च रुद्राः यक्षाधिपा दानवमानवाश्च ।
बालाश्चवृद्धाः प्रमदास्सुशीलाः त्वत्पादसेवामभिकाङ्क्षमाणाः ॥ ७॥

भक्तानुरागिन् भवतापहारिन् लिङ्गानुसङ्गिन् विषयेविरागिन्
कैवल्यदायिन् परमावतारिन् कन्दर्पनाशिन् शिवयोगतोषिन् ॥ ८॥

अनन्तजन्मार्जित पुण्यशेषैर्मानुष्यदेहं परिगृह्यजातान् ।
त्वत्पादसङ्गेन विशुद्ध देहान् भक्त्यासदाचारपरान् विधातुम् ॥ ९॥

देहत्रये वै वरलिङ्गसङ्गं कर्तुं नितान्तं स्थलषट्क बोधम् ।
अङ्गीयधर्मान् परिलीयलिङ्गे लिङ्गीयधर्मार्जन बोधनाय ॥ १०॥

लिङ्गाङ्गसम्बन्धविबोधनार्थं कृपां कुरुष्वाशु दयानिधे त्वम् ।

नैजं समाधिं परिमुच्ययोगिन् वाक्यामृतेनाशु विबोधयैतान् ॥ ११॥

त्वद्वक्र पद्मात्प्रसृतां संवाणीं संसारतप्तेषु सुधां क्षरन्तीम् ।
जन्मान्तरीयाद्बहु पुण्यशेषाल्लभ्यां निकामं परिश्रोतु मायन् ॥ १२॥

सौख्येन लिङ्गाङ्ग सुसामरस्य सम्पादनेमूलनिदानभूतम् ।
संसारतापाद्विनिवर्तमानं स्वात्माङ्गमष्टावरणं प्रवक्तुम् ॥ १३॥

वैचित्र्ययुक्तं किल विश्वमेतद् व्यक्तं कथं स्यद्विविधाङ्गरूपैः ।
सच्चित्स्वरूपं कथमेति चान्ते तन्मार्गबोधाय त्वरस्वदेव ॥ १४॥

सच्चित्स्वरूपं परिपूर्णनित्यं तत्त्वं स्वशक्त्याश्चलनेन भिन्नम् ।
विश्वस्वरूपं कथमेति सर्वं वक्तुं स्वकार्याद्विरतो भवाशु ॥ १५॥

श्रीसिद्धलिङ्गे सदयान्तरङ्गे सद्भक्तिभावेन विवर्तमानः ।
प्रभातकाले पठते य एनं प्राप्नोति सौख्यं सुतसम्पदादिम् ॥ १६॥

श्रीमन्निरञ्जन जगद्गुरु सार्वभौम
 श्री सिद्धलिङ्गयतिराट् परतत्वरूप ।
चन्द्रार्कवह्नि नयनाऽमरवृन्दवन्द्य
 संरक्ष भो बसवराजबुधं मुदैव ॥ १७॥

श्रीरायचूरु वरमण्डल मध्यदेशे ।
 श्रीसिन्धनूरिति विभाग शिरोमणौ च ।
शोभान्विते पगडदिन्नि सुनामग्रामे ।
 मेधायुतो बसवराज सुधीः कवीन्द्रः ॥ १८॥

मुक्तकं
पायाच्छ्रीमदनादि भक्तबसव स्वान्ताम्बुजान्ते स्फुर-
द्धंसो योगिमनोनिशान्त विमलज्ञान प्रदीपो विभुः ॥

भक्तादिस्थलषट्कनिर्णयपथं संस्थापयन् भूतले ।
सिद्धेशः करुणामयः परतर श्री तोण्टदार्याह्वयः ॥

इति श्रीबसवराजशास्त्रिविरचितं श्रीमदविरळपरञ्ज्योति-
जगद्गुरु-सार्वभौम-एडेयूर-तोण्टद श्रीसिद्धलिङ्गमहाशिवयोगिनां
सुप्रभातं सम्पूर्णम् ।

Proofread by Vani V.

*Shri Siddhalingamahashivayogi Suprabhatam*

pdf was typeset on October 31, 2022

Please send corrections to *sanskrit@cheerful.com*